तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ॥
हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु ।
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ॥
आम्लन्तु दीपनं रुच्यं किञ्चित् पित्तकरं लघु ।
अम्लन्तु पित्तजननमम्लं वातकफापहम् ॥”

इति भावप्रकाशः ॥

दाड़िमपुष्पकः, पुं, (दाड़िमस्य पुष्पमिव पुष्पं यस्य । कन् ।) रोहितकवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ रोहड़ा इति ख्यातः ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
“रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः ॥”)

दाड़िमप्रियः, पुं, (दाड़िमफलं प्रियं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

दाड़िमभक्षणः, पुं, (भक्षयतीति । भक्षि + ल्युः । भक्षणो भक्षकः । दाड़िमस्य भक्षणः ।) कीरपक्षी । इति शब्दचन्द्रिका ॥ (दाड़िमभक्षके, त्रि ॥)

दाड़िमीसारः, पुं, (दाड़िमीं दाड़िमीशब्दं सरति प्राप्नोतीति । दाड़िमी + सृ + अण् ।) दाड़िमः । इति राजनिर्घण्टः ॥

दाड़िम्बः, पुं, दाड़िमः । इति त्रिकाण्डशेषः ॥ (दाड़िमशब्देऽस्य विशेषो ज्ञातव्यः ॥)

दाढ़ा, स्त्री, (दैप् शोधने, दा दाने वा + क्विप् । दे शुद्धै दानाय वा ढौकते इति । ढौक + डः ।) दन्तविशेषः । तत्पर्य्यायः । दंष्ट्रा २ जम्भः ३ । इति हेमचन्द्रः ।३।२४७॥ प्रार्थना । समूहः । इति शब्दार्थकल्पतरुः ॥

दाढ़िका, स्त्री, (दाढ़ायै केशसमूहाय प्रभवतीति । ठक् ततष्टाप् ।) मुखावयवविशेषः । दाढ़ि इति भाषा । (यथा, मनुः । ८ । २८३ ।
“पादयोर्दाढ़िकायाञ्च ग्रीवायां वृषणेषु च ॥”
“दाढ़िकायां श्मश्रुणि ॥” इति तट्टीकायां कुल्लूकभट्टः ॥ दाढ़ा + स्वार्थे कन् कापि अत इत्वञ्च ।) दंष्ट्रिका । इति हेमचन्द्रः ।३।२४७ ॥

दाण्डाजिनिकः, त्रि, (दण्डाजिनेन शाठ्येन दम्भेन वा अर्थानन्विच्छतीति । दण्डाजिन + “अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ।” ५।२।७६ । इति ठञ् ।) कुहकः । इति हेमचन्द्रः । ३ । ४१ ॥

दातं, त्रि, (दायते स्म इति । दा लवने + क्तः) छिन्नम् । इत्यमरः । ३।१।१०३॥ (दैप् शोधने कर्म्मणि क्तः । शुद्धम् ॥)

दाता, [ऋ] त्रि, (ददातीति । दा दाने + “ण्वुल्तृचौ ।” ३।१।१३३ । इति तृच् ।) दानकर्त्ता । तत्पर्य्यायः । दारुः २ सुचिरः ३ । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे ।७।२०।२।
“कर्त्ता सुदासे अह वा उ लोकं
दाता वसु मुहुरादाशुषे भूत् ॥”)

दात्यूहः, पुंस्त्री, (दाप् लवने + क्तिन् । दा रवं ऊहते इति । दाति + ऊह + अण् । यद्वा, दो अवखण्डने क्तिन् । दितिं वहतीति । वह + क + ऊट् । दित्यूहः । ततः स्वार्थे अण् । ततः “देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ।” ७।३।१। इति आत्वम् ।) पक्षिविशेषः । डाउक इति भाषा । तत्पर्य्यायः । कालकण्ठकः २ । इत्यमरः ।२।५।२१॥ अत्यूहः ३ दात्यौहः ४ कालकण्ठः ५ मासङ्गः ६ शितिकण्ठः ७ कषाटुरः ८ । इति शब्दरत्नावली ॥ काकमद्गुः ९ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ५ । १२ ।
“सारसं रज्जुबालञ्च दात्यूहं शुकसारिके ॥”
(अस्य गुणा यथा,—
“दात्यूहो मरुतश्च नाशनकरो ह्यर्थोऽतिशुक्रप्रदः
श्रेष्ठः सर्व्वगुणः श्रमोपशमनः तुष्टिप्रदो वातहा ॥”
इति हारीते प्रथमेस्थाने एकादशेऽध्याये ॥)
“प्रावृट्काले सुखी भूत्वा को वा कुत्र न गच्छति ।
इति वदति दात्यूहः को वा को वा क्व वा क्व वा ॥”
इत्युद्भटः ॥)
जलकाकः । इति राजनिर्घण्टः ॥ चातकः । इति मेदिनी । हे, १७ ॥ मेघः । इति शब्दरत्नावली ॥

दात्यौहः, पुं, स्त्री, (दित्यौह + स्वार्थे अण् । देविकाशिंशपेत्यादिना आत्वम् ।) दात्यूहः । इति शब्दरत्नावली ॥

दात्रं, क्ली, (द्यति दाति वानेनेति । दो अवखण्डने दा लवने वा + “दाम्नीशसेति ।” ३ । २ । १८२ । इति ष्ट्रन् । दादिभ्यश्छन्दसीति वन् वा ।) अस्त्रविशेषः । इति भरतः ॥ दा इति काश्या इति च भाषा । तत्पर्य्यायः । लवित्रम् २ । इत्यमरः । २।८।१३॥ खड्गीकम् ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते ।५।१५४।७ ।
“सशूर्पपिटकाः सर्व्वे सदात्राङ्कुशतोमराः ॥”
भावे ष्ट्रन् । दानम् । यथा, ऋग्वेदे ।१।११६।६।
“तद् वां दात्रं महिकीर्त्तेन्यम्” ।
“तद्दात्रं दानम् महि महदतिगम्भीरम् ।” इति तद्भाष्ये सायनः ॥ दानकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । १० । ६ ।
“सोमस्य दात्रमसि ॥”)

दात्री, स्त्री, (ददातीति । दा + तृच् + ङीप् ।) दानकर्त्री । इति व्याकरणम् ॥ (गङ्गा । यथा, काशीखण्डे ।२९।८७। तस्याः सहस्रनामकीर्त्तने ।
“दीनसन्तापशमनी दात्री दवथुवैरिणी ॥”)

दात्वः, पुं, (ददातीति । दा + “जनिदाच्युसृ...इति ।” उणां ४ । १०४ । इति त्वन् ।) दाता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (क्ली, यज्ञकर्म्म । इत्युज्ज्वलदत्तः ॥)

दाधिकं, त्रि, (दध्नि दध्ना वा संस्कृतं दध्ना चरति दधि + “चरति ।” ४।४।८। इति ठक् । (दध्ना उपसिक्तम् । “व्यञ्जनैरुपसिक्ते ।” ४ । ४ । २६ । इति ठक् वा ।) दधिसंस्कृतवस्तु । इति हेमचन्द्रः । ३ । ७४ ॥ (औषधविशेषे, क्ली । यथा, सुश्रुते उत्तरतन्त्रे । ४२ ।
“बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥”)

दान, श आर्ज्जवे । छिदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं सेट् ।) ऋजुरवक्रस्तस्य भाव आर्ज्जवं ऋजुकरणम् । श, दीदांसति दीदांसते काष्ठं वर्द्धकिः ऋजु करोतीत्यर्थः । ऋजुभावः इति विद्यानिवासः । दीदांसति साधुः । ऋजुः स्यादित्यर्थः । छेदे दानति दानते । इति वोपदेवः । तत्र तिवादयो न स्युरिति रमानाथः । इति दुर्गादासः ॥

दानं, क्ली, (दा दाने दो अवखण्डने दैप् शोधने भावादौ ल्युट् ।) गजमदः । (यथा, माघे । ५ । ३७ ।
“दानं ददत्यपि जलैः सहसाधिरूढ़े
को विद्यमानगतिरासितुमुत्सहेत ॥”
“दीयते इति दानं धनं गजमदश्च ।” इति तट्टीकायां मल्लिनाथः ॥) पालनम् । छेदनम् । शुद्धिः । इति मेदिनी । ने, १० ॥ वृक्षकोटरकीटजमधु । अस्य गुणाः । रूक्षत्वम् । दीपनत्वम् । कफच्छर्दिमेहनाशित्वञ्च । इति राजवल्लभः ॥ देवब्राह्मणादिसम्प्रदानकद्रव्यमोचनम् । तत्पर्य्यायः । त्यागः २ विहापितम् ३ उत्सर्ज्जनम् ४ विसर्ज्जनम् ५ विश्राणनम् ६ वितरणम् ७ स्पर्शनम् ८ प्रतिपादनम् ९ प्रादेशनम् १० निर्व्वपणम् ११ अपवर्ज्जनम् १२ अंहतिः १३ । इत्यमरः ।२।७।२९॥ दायः १४ । इति त्रिकाण्डशेषः ॥ प्रदानम् १५ ददनम् १६ विश्रणनम् १७ दत्तिः १८ अंहती १९ उत्सर्गः २० अतिसर्ज्जनम् २१ स्पर्शः २२ विसर्गः २३ त्यजनम् २४ प्रदेशनम् २५ । इति शब्दरत्नावली ॥ * ॥ तस्य लक्षणादि यथा,—
“अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते ॥
सम्प्रदानस्वत्वापादकद्रव्यत्यागो दानमिति ॥ * ॥
दाता प्रतिग्रहीता च श्रद्धादेयञ्च धर्म्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ॥
मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥
परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ।
गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु ॥
यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः ।
दद्यात् स्वजातिशिष्येभ्यस्तदभावेषु निःक्षिपेत ॥
स्नात्वा शुद्धे समे देशे गोमयेनोपलेपिते ।
वसित्वा वसनं शुद्धं दानं दद्यात् सदक्षिणम् ॥ * ॥
एकां गां दशगुर्दद्यात् दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात् सहस्रं बहुगोधनः ॥
ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किन्न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
अपरावाधमक्लेशं प्रयत्नेनार्ज्जितं धनम् ।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ॥ * ॥
विक्रयश्चैव दानञ्च न नेयाः स्युरनिच्छवः ।
दाराः पुत्त्राश्च सर्व्वस्वमात्मन्येव च योजयेत् ॥
आपत्काले च कर्त्तव्यं दानं विक्रय एव च ।
अन्यथा न प्रवर्त्तेत इति शास्त्रविनिश्चयः ॥ * ॥
यज्ञो दानं तपो जाप्यं श्राद्धं सुरपूजनम् ।